# वैयाकरणसिद्धान्तकौमुदीस्थं
# कारक-प्रकरणम्

प्रस्तोत्री - डॉ. लक्ष्मी शर्मा
( गौविन्दं संस्कृतसदः )

# विवक्षातः कारकाणि भवन्ति

**सर्वाण्यपि कारकाणि वक्तुः इच्छाधीनानि सन्ति।**
**अस्येदं तात्पर्यम्–**

**१. अग्निः भोजनं पचति।**

**अथवा**

**२. पाचकः अग्निना भोजनं पचति।**

- **एतयोः वाक्ययोः उभयत्र 'अग्निः' प्रयुक्तः, परन्तु एकत्र कर्तृत्वेन चेत् अन्यत्र करणत्वेन।**
- **सारोऽयम्–** यदा यदीयो व्यापारो धातुनाभिधीयते तदा सः कर्ता। अग्नेः प्रबलतेजस्वत्त्वं यदि वक्तुमिष्यते तदा अयं कर्ता।

# विभक्तिषु आद्या प्रथमाविभक्तिः

**प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा**

१. प्रातिपदिकार्थमात्रे- अव्ययानि, नियतलिङ्गाः च उच्चैः, नीचैः रामः, श्रीः, ज्ञानम्

२. प्रातिपदिकार्थे सति लिङ्गमात्राधिक्ये- तटः, तटी, तटम्

३. प्रातिपदिकार्थे सति परिमाणमात्राधिक्ये- द्रोणः व्रीहिः

४. वचनमात्रे- एकः, द्वौ, बहवः

द्वन्द्वादौ द्वन्द्वमध्ये द्वन्द्वान्ते च श्रूयमाणं पदं प्रत्येकम् अभिसम्बध्यते।

प्रातिपदिकार्थः

# को नाम प्रातिपदिकार्थः?

यस्मिन् प्रातिपदिके उच्चारिते सति यस्य अर्थस्य नियमेन भानं स प्रातिपदिकार्थः

**सामान्यतः**

1. स्वार्थः 2. द्रव्यम्
3. लिङ्गम् 4. संख्या
5. कारकम्

**मुख्यतः**

1. स्वार्थः / प्रवृत्तिनिमित्तम्
2. द्रव्यम्/ प्रवृत्तिनिमित्ताश्रयः

**कृष्ण-प्रातिपदिके**

**प्रवृत्तिनिमित्तम्**- देवकीवसुदेवसुतत्वम्

**द्रव्यम्** - उक्तार्थवान् जनः।

# १. प्रातिपदिकार्थमात्रे प्रथमाविभक्तिः –

प्रातिपदिके उच्चारिते सति तस्यार्थः तस्य स्वरूपं च बुद्धौ नित्येन उपस्थितौ भवतः। अतः प्रातिपदिकार्थमात्रे इत्यस्य द्विविधे उदाहरणे–

**अलिङ्गाः / अव्ययानि**

उच्चैः, नीचैः, किम्

**एतेषां शब्दानाम् उच्चारणे तत्तदर्थानामेव प्रतीतिः भवति**

**नियतलिङ्गाः**

कृष्णः, श्रीः, ज्ञानम्

एतेषां शब्दानाम् उच्चारणे तत्तदर्थानां तत्तल्लिङ्गानां च नित्येन प्रतीतिः

**जिज्ञासा** – अव्ययेभ्यः विभक्तिविधानं किमर्थम्?

**समाधानम्**– 'अपदं न प्रयुञ्जीत' इति भाष्यकृदुक्त्या सुप्-विधानेन 'सुप्तिङन्तं पदम्' इति पदत्वसाधनार्थम्।

**जिज्ञासा**– **'पञ्चकं प्रातिपदिकार्थः'** इति सामान्यतः **द्विकम् प्रातिपदिकार्थः** इति मुख्यम् इत्यस्य कोऽभिप्रायः?

**समाधानम्**– दधि मधु इत्यादिशब्देषु विभक्तिं विनापि स्वार्थ-द्रव्य-लिङ्ग-संख्या-कारकाणां प्रतीतेः। परन्तु-लिङ्ग-संख्या-कारकाणाम् उपस्थितेः अनिश्चितत्वात् मुख्यप्रातिपदिकार्थे स्वार्थ-द्रव्ययोरेव ग्रहणम्।

# २. प्रातिपदिकार्थे सति लिङ्गमात्राधिक्ये :-

**प्रातिपदिकार्थे सति लिङ्गमात्राधिक्यस्य उदाहरणम्-**

**तटः ( पुं. )** **तटी ( स्त्री )** **तटम् ( न. )**

(तटं त्रिषु- इत्यमरकोशः)

**- तट-प्रातिपदिके उच्चारिते सति 'नद्याः पार्श्ववर्ती प्रदेशः' इत्यर्थः नियततया उपस्थितो भवति- अतः सः प्रातिपदिकार्थः, तदतिरिच्य भिन्न-भिन्नलिङ्गेषु भिन्न-भिन्नलिङ्गानाम् उपस्थितिः आधिक्येन भवति। अत इदं लिङ्गमात्राधिक्यस्य उदाहरणम्।**

# ३. प्रातिपदिकार्थे सति परिमाणाधिक्ये :-

**प्रातिपदिकार्थे सति परिमाणमात्राधिक्यस्य उदाहरणम्-**

द्रोणः व्रीहिः -

- अत्र द्रोणशब्दात् परिमाणार्थे प्रथमा तेन 'सु' इत्यस्य 'परिमाणम्' अर्थः।
- एवं कृते सति- द्रोणरूपं यत्परिमाणं तत्परिच्छिन्नो व्रीहिरित्यर्थः।
- प्रत्ययार्थे परिमाणे प्रकृत्यर्थोऽभेदेन संसर्गेण विशेषणम्।

प्रकृति-प्रत्ययार्थयोः प्रत्ययार्थस्य प्राधान्यम्

द्रोण → सु

द्रोणपरिमाणम् — अभेदसम्बन्धः → परिमाणम्

- प्रत्ययार्थस्तु परिच्छेद्यपरिच्छेदकभावेन व्रीहौ विशेषणमिति विवेकः।

द्रोणः — परिच्छेद्य-परिच्छेदक-भावसम्बन्धः — व्रीहिः

- द्रोणो व्रीहिः' इति सम्पूर्णस्य अर्थो भवति-

  द्रोण-परिमाण-परिच्छिन्नो व्रीहिः।

# ४. वचनमात्रे प्रथमा :-

**वचनमात्रस्य उदाहरणानि :-** एकः द्वौ बहवः

**जिज्ञासा-** **वचनशब्दे किमर्थं न 'प्रातिपदिकार्थे सति' इति योगः?**

**समाधानम्-** लिङ्ग-परिमाणवद् अत्र न **'प्रातिपदिकार्थे सति'** इति योगः, संख्यायाः अन्यप्रातिपदिकार्थं विना एकादिशब्देषु नियतोपस्थितेः सत्त्वात्

**जिज्ञासा-** **'एकादिशब्देभ्यः प्रातिपदिकार्थमात्रे' एव किमर्थं न प्रथमा?**

**समाधानम्-** एकादिप्रातिपदिकादेव संख्याप्रतीतेः 'उक्तार्थानाम् अप्रयोगः' इति न्यायेन एकत्वद्वित्वादि-अर्थेषु प्रथमा न प्राप्ता आसीत्, अतो विशेषविधानं कृतम्।

राम- प्रातिपदिकम्

दशरथपुत्रत्वम्, व्यक्तिः च - प्रातिपदिकार्थः

सुप्रत्ययः - प्रातिपदिकार्थ. द्व्येकयोर्द्विवचनैकवचने

बहुषु बहुवचनम्

एकत्वम्, कर्तृत्वम्

परन्तु-

एक- प्रातिपदिकम्

एकत्वम् - प्रातिपदिकार्थः

सुप्रत्ययः - एकत्वम्

अतः 'प्रातिपदिकार्थमात्रे सुप्रत्ययः प्राप्तः नास्ति।

विष्ठाविधानम्- प्रातिपदिकार्थसूत्रे 'वचन'ग्रहणम्

# सम्बोधने प्रथमा

❖ सम्बोधनम् = अभिमुखीकरणम्

❖ सम्बोधने च = 'प्रातिपदिकार्थे सति सम्बोधनाधिक्ये गम्येऽपि प्रथमा' इति सूत्रार्थः।

❖ उदाहरणम् = हे राम! मां पाहि।

हे राजन्! सार्वभौमो भव।

❖सम्बोधनविभक्तिविषये नियमः –

**इयम् अनुवाद्यविषया न तु विधेयविषया।**

अर्थात् '**हे राजन् सार्वभौमो भव**' इति वाक्ये राज-सार्वभौम-शब्दाभ्यां बोध्यः एक एवास्ति परन्तु यथा राजशब्दात् सम्बोधने प्रथमा, न तथा सार्वभौमशब्दात्। सार्वभौमत्वस्य विधेयत्वात्।